क्र. नं. ४३ बं.नं. १० पु.नं. :

अंक १७

1.81

संवत्सरोत्सवकालनिर्णयपत्रे ७५

श्रीगोपिजनवल्लभोजयति श्रीगोकुलेन्द्रपादाब्जपरागपरिपूर्तये॥ कायवाङ्मनसा
नित्यं वंदे वल्लभनंदनं॥१॥ श्रीविठ्ठलेन्द्रपादाब्जपरागासक्तचेतसा॥ पुष्टिमार्गप्रवृत्तानां
भक्तानां बोधसिद्धये॥२॥ संवत्सरोत्सवद्दैर्युक्ता कल्पलता मया॥ क्रीयते तेन संतुष्टाः
संदा संतु मयीश्वराः॥३॥ भगवज्जन्ममूलत्वात्सर्वं भाद्रपदोत्सवः॥ निर्णीयंते विचारेण
सप्रमाणं यथामति॥४॥ मासि भाद्रपदे लक्ष्माजन्माष्टम्युच्यते बुधैः॥ तस्यामेवद्दिष्ठदा
या उत्सवः लक्ष्म सेवकैः॥५॥ कर्तव्यः सर्वभावेन मंगलादियुतः सदा॥ तदंगत्वेनोत्सवा
सः कार्योघात्तेदष्टधये॥६॥ तत्राष्टधास्वरूपं तु सप्तमी वेधवर्जितं॥ यदा त्वेवं सप्तमी १
स्यादष्टमी च क्षयं गता॥७॥ तदाष्टधा नवम्येवोपोष्या स्वाचार्यवाक्यतः॥ पुरुषोत्तमप्रा
कट्यं यतो नंदस्यद्रेमतं॥८॥ तत्रोत्सवो नवम्यां वै प्राकट्यं च तथैव हि॥ श्रीमदाचार्यचरणै

रतएवनिरूपितं॥९॥अनेनेत्यादिनवमीह्युपोष्येसंततःस्फुटं॥एतदेवासंधायप्रोक्तंश्रीविठ्ठ
लेश्वरैः॥१०॥यदीत्सारसपूर्वोक्तरीतिरेकेतिसंस्फुटं॥रीतिरित्युक्तितोपूर्वविधामान्याक
दापिन॥११॥अन्यथापूर्वविद्धेतिस्पष्टारीतिःकथंटता॥अन्यथाश्रीमदाचार्योक्तौविरोधो
नवेस्फुटं॥१२॥तद्विरोधेनकथनंनश्रीविठ्ठलसंततेः॥तस्मादुक्तस्वरूपेणैवोत्सवोपोष
णमतं॥१३॥तत्रचप्रातरारभ्यउत्सवमत्रनिरूप्यते॥प्रातःस्नात्वाचविधिनाप्रबोध्यव्रज
वल्लभं॥१४॥मंगलारात्रिकंकृत्वामंचकेस्थापयेत्प्रभुं॥पीतांबरपरीधानंकारयित्वाव्रज
जाधिपे॥१५॥कुंकुमाद्युत्तसंयुक्तंतांबूलद्वयसंयुतं॥धृत्वापात्रेकरेकुर्यात्तिलकंगोकुला
धिपे॥१६॥भेरीमृदंगघोषेश्चगीतवादित्रमंगलैः॥पंचामृतेनसप्रेमस्नपनंकारयेद्वि
तोः॥१७॥पुनःसुगंधतैलेनकुंकुमेनसुगंधिना॥आनंदितःकारयेद्देहेमंगंचोत्सवारि

णा॥१९॥ततःप्रोक्ष्यतमंगानांकुर्याद्वस्त्रेणरूतनैः॥ततोमहार्हालंकारैर्वस्त्रैःकुंकुमरंजितैः॥
१२॥अलंकुर्वीतगोपीन्द्रमुष्णीषादितिरूतमैः॥ततोद्विजवरेदद्याद्दक्षिणांप्रेमसंयुतः॥२०॥
कुंकुमाक्तंततोबूलद्वयमारात्रिकंतथा॥नालिकेरद्वययुतंमुद्राद्वयसमन्वितं॥२१॥गीतवा
दित्रघोषैश्चकुर्यादारात्रिकंविभोः॥नालिकेरद्वयंमुद्राद्वयंचार्पितथैवहि॥२२॥निवेद्यत
स्मपादाग्रेदंडवत्प्रणमेद्भुवि॥नंदनंदनगोपीन्द्रायश्रीदामप्राणवल्लभेनः॥२३॥याद्दशोस्मि
हरेदास्यतादशायनमोनमः॥एवंमुहुर्यद्वानकैःप्रेमविकलचेतसा॥२४॥पुलकोद्भिन्न
सर्वांगस्त्रिवारंप्रणमेद्विभुं॥ततःसमर्पयेच्छय्यापकान्तेसुस्तरेपयं॥२५॥सतिलंसगुडंसुं
स्वरापयेतिवदन्मुहुः॥ततश्चविधिवत्कृत्यंयथार्हर्वंसमाचरेत्॥२६॥ततःश्रीदास्यविश्राम २
समयेवैष्णवैसह॥मध्याह्नंगमयेदास्यकथाभिःस्मरणेनच॥२७॥ततःसायाह्निकंदास्यं

यथाहर्वं विधाय वै॥ निशीथे च दिने चैव कुर्याज्जन्मोत्सवं विभोः॥२८॥ भगवन्निकटे स्थित्वा
देवकीप्रेमसंप्लुतः॥ यशोदानंदगोगोपीगोपादिभिरलंकृतं॥२९॥ व्रजं ध्यात्वा ततः स्व
स्थं हृदि श्रीपुरुषोत्तमं॥ कंदर्पकोटिसौंदर्यं प्रादुर्भूतं विचिंतयेत्॥३०॥ ततः शंखमृ
दंगादिभेरीनाद्यैः सुमंगलैः॥ स्नपनं पंचकैः कुर्यात्क्रमेन तथा विभोः॥३१॥ पीतांबरे
र्भूषयित्वा सुगंधैः पुष्पमाल्यकैः॥ कुंकुमागरुसाराभ्यां पटवासैस्तथैव च॥३२॥ तुल
सीमंजरीभिश्च हरजयेत्पुरुषोत्तमं॥ ततश्चतुर्विधं भोज्यमनेकरससंयुतं॥ रोचकव्यं
जनोपेतं रसालादधिदुग्धमत्॥३३॥ विविधापूपपक्वान्नसेयावादि समायुतं॥ समर्प
येन्महाभोगं धूपदीपादिभिस्तथा॥३४॥ अर्पयेच्च तथा स्वाहन्यच्चतुरकमोदकाः
।षष्टिका हृजनं कुर्यात्ततः प्रेमपरिप्लुतः॥३५॥ ततश्चाचमनादीनि दत्त्वा ताम्बूलमर्पयेत्

त्रेखालंकरणं दत्वा तत्र संदोलयेद्विभुं ॥३६॥ नवनीतसिताद्राक्षाकदलीदाडिमादिकं ॥
नालिकेरं मोदकादि प्रेम्णा तत्र निवेदयेत् ॥३७॥ वाद्यैश्च बहुभिर्देवैः काष्ठक्रीडनकैस्तथा ॥
लालयेत्सरयानत्वा यशोदोत्संगसंगतं ॥३८॥ हरिद्राकुंकुमतैलाद्भिर्गोरसैर्विविधैस्तथा ॥
सिंचन्विलज्जोगीताद्यैर्नृत्यैत सदवैष्णवैः ॥३९॥ एवं रात्रिविधिं कृत्वा स्नात्वा सर्वे कमान
सः ॥ भोजयित्वा सदानंदं कुर्यादारात्रिकं तथा ॥४०॥ स्वापयित्वा ततः कृष्णं वैष्णवान्भो
जयेद्बहून् ॥ भुंजीत तदनुज्ञातं प्रेमसंयुतः ॥४१॥ एवं जन्मोत्सवं कुर्याद्यो नको मैवस
रः ॥ तस्तस्पाक्रोपि काधीना पादाब्जे सुदृढा रति ॥४२॥ अथ श्रीगोकुलाधीशप्रियाज
न्ममहोत्सवः ॥ निरूप्यते यस्तानेनन्नक्तिर्भवति सुस्थिरा ॥४३॥ मासे भाद्रपदे शुक्लाष्ट ३
मी राधाष्टमी श्रुता ॥ कर्तव्योत्र उत्सवस्तत्र मंगलैर्विविधैः शुभैः ॥४४॥ प्रातः सेवाययाऽ

वह्नित्वात्तत्र तु वैष्णवः॥ सुगंधतैलकाश्मीरैः स्नपनं कारयेद्विभोः॥४५॥ काश्मीररंजिते
वस्त्रे महार्घमणिभूषणैः॥ गुंजाभिर्गोपिकाधीशं भूषयेत्सप्रियं प्रभुं॥४६॥ ततश्च वि
विधैर्भोज्यैः पक्वान्नैश्चातिकोमलैः॥ दधिदुग्धरसालाद्यैः सूपान्नैः पायसादिति॥४७
नवनीतसिताद्राक्षाकदलीदाडिमादिभिः॥ भोजयेद्गोपिकाधीशं पंजीरकमोदकैः॥४८
ततः कर्पूरकस्तूरीयुतं तांबूलमर्पयेत्॥ कुर्यादारात्रिकं मुक्तानालिकेरदयान्वितं॥४९
तांबूलद्वयसंयुक्तं कुंकुमाक्षतसंयुतं॥ राधिके त्वत्कृपातो कुर्विस्यत्कामान्हृमेन्नमे द्विजं॥५०
एवं श्रीमत्स्वामिनीनां कुर्याज्जन्ममहोत्सवं॥ प्रयतो यो नमेत्कृत्या पुष्टि। नक्किं लभेत्तसः
५१॥ अथ श्रीवामनजयंत्युत्सवो विनिरूप्यते॥ मासि भाद्रपदे शुक्ले द्वादश्यां श्रवणा
न्विता॥५२॥ उपोष्यास्तोत्सवांगं न धीयात्स्वविधिनोत्सवः॥ तथैव श्रीमदाचार्यैर्निबंधे

विनिरूपितं॥५३॥तथाच वामनजयंत्युत्सवेत्सादिना स्फुटं। प्रातः सेवादिकं कृत्वा यथाव
ज्जेकुलेश्वरं॥५४॥कुंकुमेन सुगंधेन तैलाद्यैः स्नापयेत्ततः। पीतांबरेण मालैर्मेख
लान्नूपुरांगदैः॥५५॥ पुष्पैश्च मुकुटेनापि भूषयेत्पुरुषोत्तमं॥ पुनर्मध्याह्नसमये स्ना
पयेत्संचकैर्विभुं॥५६॥पीतांबरं परीधाय पूजयेत्कुंकुमादिभिः॥ दध्योदनेन च पक्वान्नेन्म
धुस्वादु समर्पयेत्॥५७॥कृत्वा चारात्रिकं विप्रो दंडवत्प्रणमेद्भुवि। मेखलाजिनदंडादि
धारयन्तं च वामनं॥५८॥नमोस्तु देहि मे भक्तिं शरणागतपालक॥ एवं स्तुत्वा विसृज्य
त्मंनि रंबुधरियेद्व्रतं॥५९॥ एकादशी द्वादशी च श्रवणर्क्षस्पृष्टा॥ यदि॥ तदा तद्दैव कर्तव्यो ४
द्युत्सुको विष्णुश्रृंखले॥६०॥यदा ऋक्षं न लभ्येत वैष्णवं द्वादशीदिने॥ एकादशीदिने कार्य
स्तदोत्सवविधिं बुधैः॥६१॥इति सेवत्सरोत्सवकल्पलतायां भाद्रपदोत्सवनिरूपणं नाम

अथमंदलं॥ निरूप्यंते तु भक्तार्थमथाश्विनमहोत्सवाः॥ आश्विनस्यासिते पक्षे दशमी श्रव
णान्विता॥१ विजयासा तिथिर्यत्र विजयार्थं रघुप्रियः॥ प्रस्थितस्तत्र कर्तव्यो भक्तैर्ज
यमहोत्सवः॥ सा सायं व्यापिनी ग्राह्या सर्वलोकानुसारतः॥२॥ प्रातः सुगंधकाश्मीरै
रभ्यंगं कारयेत्प्रभोः॥ ततश्च कंचुकोष्णीषादिभिः श्वेतैर्महोत्तमैः॥३॥ अलंकुर्वीत संप्रे
म महार्घैर्भूषणैरपि सायंकाले ततः कुर्यात्तिलकं कुंकुमाक्षतैः॥४॥ तांबूलधृतयोना
पिष्टकसारात्रिके तथा॥ स्थापयित्वाग्रे कुबेराशोत्तमांगे यवांकुरान्॥५॥ रोमांचित
तनुर्भक्त्या प्रणमेद्देउवसुरः॥ ततः समर्पयेद्वाग्रे तत्राश्वदशमीदकान्॥६॥ एवं यः
कुरुते भक्त्या गोविंदे विजयोत्सवं॥ स वै श्रीगोकुलाधीशचरणे रतिमाप्नुयात्॥७॥
आश्विनस्यामले पक्षे पौर्णमास्यां तु वैष्णवः॥७॥ आश्विनस्यामले पक्षे पौर्णमास्यां तु

वैष्णवः॥ तो लीलां मनसा ध्यायन्कुर्यादुत्सवमद्भुतं॥८॥ प्रातःसुगंधतैलेन कुंकुमेन
सुगंधिना॥ स्नापयित्वा गोपिकेशं भूषयेत् भूषणोत्तमैः॥९॥ केकिपिच्छोद्भवेनैव मु
कुटेनातिचारुणा॥ कंकणांगदकांचीभिर्विविधैश्च भूषणैः॥१०॥ मुक्ताहारैस्तथा गुं
जामणिनां हारविचित्रकैः॥ ततश्च तिलकं कुर्यात्स्मरेत्स्वाद्वयात्मकं॥११॥ पाटीरेण तत्
कुर्यात्तन्मध्ये मृगनाभिजं॥ बिंदुं ततश्च तन्मध्ये मौक्तिकं बिंदुमेव च॥१२॥ ततो मक
रिकापत्रं लिखेत्लक्ष्म कपोलयोः॥ पीतांशुकैर्भूषयित्वा स्मरेद्रुक्मकदंबकं॥१३॥ ततश्च
विविधैर्भोज्यैर्भोजयेद्रूपिकागतिं॥ मंगलैर्गीतवाद्यादिस्तोत्रैः संतोषयेत्प्रभुं॥१४॥ तता
चारात्रिकं प्रेम्णा प्रेण मेरूकुलाधिपे॥ एवं सेवेत यो भक्त्या सतत्स्वसमवाञ्छया त॥१५ ५०
इति श्रीसेवकसरणौ सेवकस्य लतायां माध्विनोत्सव निरूपणं नाम द्वितीयदलं॥ ॥

निरूप्यंतेतेऽथमंतव्यानां उत्सवे कार्तिकोत्सवाः॥ कार्तिकस्यासितपक्षे चतुर्दश्यां विधूदये
सीतालोष्ठसमायुक्तं सकंटकदलान्वितं॥ अपामार्गं भ्रामयित्वा तदा दीपपुरःसरं॥ कु
र्यात्सुशोभनं स्नानं तिलकं कुंकुमाक्षतैः॥२॥ समर्पयेत्तथा चाग्रे भक्त्या तांबूलकद्वयं
ततश्चाभ्यंगविधिना स्नापयेऽकुलात्विषं॥३॥ नवीनैः श्वेतवस्त्रैश्च भूषयेत्सुरुषोत्त
मो बुधैः॥ दीपोत्सवः कार्यः सायंव्यापिनि पर्वणि॥४॥ शिरस्यभ्यंगविधिना स्नापयेऽ
कुलेश्वरं॥ ततश्चानुत्तमैः श्लक्ष्णै कंचुकोष्णीषवादिभिः॥५॥ विविधैर्भूषणैश्चापि भूष
येद्व्रजनायकं॥ ततो निवेदयेऽदूपमत्पश्चापि दीपकान्॥६॥ सायंकाले ततः कुर्याद्दी
तलैश्च सुहरितैः दीपकैश्चोज्वलां रात्रिं गीतैर्वाद्यैर्मनोरमैः॥७॥ ततश्च दाडिमद्रा
क्षाकदलीक्षुरसोद्भवैः॥ रसैर्विकारैर्विविधैस्तांबूलैश्च सुशोभनैः॥८॥ सुगंधागरुक

ह्रकस्तूरीलेपनादिभिः॥माल्यैःसुगंधपुष्पानांयथाभागंडमंडयेत्॥९॥ततश्चारात्रिकंदे
त्वास्वापयेत्सुरूषोत्तमं॥द्वितीयेन्हिततःकुर्यादन्नकूटमहोत्सवं॥१०॥स्नापयित्वाविष्णुं
प्रातर्भूषयेद्भूषणोत्तमैः॥शुभ्रैःसकंचुकोष्णीषैस्तथापीतांशुकैरपि॥११॥ततश्चनिसव
कृष्णंपूजयेद्भोजनादिभिः॥ततोगोवर्द्धनगिरिंस्नापयेत्पयसागवां॥१२॥पुनःशीतजलैः
शुद्धैःसुगंधैश्चंदनादिभिः॥ततश्चतुलसीपुष्पहरिद्राकुंकमाक्षतैः॥१३॥हरिद्रारंजितैर्व
स्त्रैर्धूपदीपादिभिस्तथा॥स्वादुभिर्विविधैश्चान्नैर्लड्डुभिर्मोदकादिभिः॥१४॥तांकृत्वारात्रि
कैःश्चापिपूजयेन्मंगलैस्स्वनैः॥अथात्रगोमयेनैवकुर्याद्गोवर्द्धनंगिरिं॥१५॥ततश्चपूज
येद्विप्रान्गोपालांश्चविशेषतः॥वस्त्रमाल्यसुपक्वान्नकुंकुमाक्षतचंदनैः॥१६॥पूजयि
त्वाचगोवस्त्रानकुर्याद्गोक्रीडनंतथा॥ततश्चाप्यसंध्यायांवराष्कुलीमोदकादिभिः॥१७

विविधैर्व्यंजनैश्चापि सूपान्नैः पायसादिभिः॥ दधिदुग्धैर्बहुविधैर्वटकैः पर्पटैस्तथा॥१८
न्नदनैश्च तथा कूटैः कृत्वा गोवर्द्धनोपमं॥ सूपदीपादिकं कृत्वा प्रोक्षणं स्वोदकैरपि॥१९
कृत्वान्नकूटे तुलसीपत्रं कृत्स्नं निवेदयेत्॥ श्रीविठ्ठलप्राणनाथं गोत्रनाथं हृदि स्मरे
त्॥ गीतैः सुमंगलैर्नैर्गसमयेतोषयेत्प्रभुं॥२०॥ ततश्चाचमनं दत्वा तांबूलं विनि
वेदयेत्॥ कृत्वा चारात्रिकं प्रेम्णा दंडवत्प्रणमेत्प्रभुं॥२१॥ ततः सुमंगलैर्गीतैश्चा
न्नकूटं परिक्रमेत्॥ य एवमुत्सवं कुर्यात्तस्य कृष्णः प्रसीदति॥२२॥ कार्त्तिकस्यासिते
पक्षे द्वितीयायां च वैष्णवः॥ प्रातरभ्यंगविधिना स्नापयेद्गोकुलेश्वरं॥२३॥ स्नात्वोष्णी
पक्षौ मस्तके कंचुकं भूषणैः॥ भूषयित्वा सतिलं कुर्यान्नीराजनं विभो॥२४॥ दध्योद
नंदनेन श्रीरामोदकं समर्पयेत्ततः॥ एवं दीपोत्सवदिनत्रयं कार्यं हि वैष्णवैः॥२५॥

कार्त्तिकस्यसितेपक्षेएकादश्यांमहोत्सवः॥विधिवद्देवदेवे भक्त्या कार्यश्चोत्थापना
त्मकः॥२६॥प्रातरभ्यंगविधिना स्नापयित्वा व्रजाधिपं॥नवैः सितोष्णीषवस्त्रैः कंचु
कादिभिरुत्तमैः॥२७॥अनुत्तमैर्भूषणैश्च भूषयेद्भक्तिमान्नरः॥ततश्च रात्रिसम
ये कुर्यादुत्थापनोत्सवं॥२८॥शंखघंटामृदंगादिवाद्यैर्गीतैः सुशोभनैः॥हरिद्राकुंकु
माद्यैश्च मंगलैश्चित्रयेद्भुवं॥२९॥कृत्वेक्षुमंडपं तत्र न्यसेत्सिंहासनोत्तमे॥मंडप
स्य चतुर्दिक्षु कुर्याद्दीपान्घृतान्वितान्॥३०॥दक्षिणाभिमुखं कृष्णं भक्त्या संस्था
पयेत्ततः॥उत्तिष्ठोत्तिष्ठ गोविंद त्यज निद्रां जगत्पते॥ त्वयि सुप्ते जगत्सुप्तमुत्थिते ७
त्वय्युत्थितं जगत्॥३१॥इति मंत्रं त्रिरुच्चार्य त्रिवारं गोपिकेश्वरं॥ सासिंहासनमुत्थाप्य
स्थाने संस्थापयेत्पुनः॥३२॥ततश्च पंचकैः कृष्णमभ्यंगविधिना तथा॥स्नापयि

त्वाहृज्जये द्दै पुष्पमाल्यैः सुगंधिभिः॥३३॥ पीतांबरं परीधाप्य तथा मृत्तिकादिकं ततः
श्च स्थापयेद्देवं संनीचाग्निसंन्नतो॥३४॥ धूपदीपादिकं दत्वा नैवेद्यं कल्पयेन्मुदा॥
अर्पयेच्च नवीनेक्षुकंदमूलफलादिकं॥३५॥ ततश्चाचमनं दत्वा तांबूलादि निवेदयेत्
निराजयेच्च प्रणमेत्प्रदक्षिणपुरःसरं॥३६॥ ततश्च जागरं कुर्याद्गुणगानादिभिर्हरेः॥ द
धिरोचकपक्वान्नान्दत्वा पात्रचतुष्टयं॥३७॥ धूपदीपैः पात्रमेकं प्रतियामं समर्पयेत्
प्रतिभोगावसानं च कुर्यादारात्रिकं तथा॥३८॥ तद्रात्रिकं यदा रात्रौ स्यात्तदोत्थापयेद्दि
वा॥ य एवं भक्तिमान्कुर्याद्भिष्मस्योत्थापनोत्सवं॥३९॥ लभते तस्य दृढां भक्तिं हरेः प्रेमात्मि
कां सदा॥ इति श्री संवत्सरोत्सवकल्पलतायां कार्त्तिकोत्सवनिरूपणं नाम तृतीयं दलं
श्री॥ ॥अथ मार्गशिरमासि प्रमेयफलबोधके॥ प्रमेयरससिद्ध्यर्थं हृज्जये

ञ्जकुलाधिपं॥१॥पटांबरैस्तु विविधैर्मृदुनिस्तूलकंचुकैः॥भूषयेद्भूषणैर्दिव्यैस्तथा मृगम
दादिभिः॥२॥मद्यैरैर्दधिदुग्धैस्तु रसपिष्टं विनिर्मितैः॥रस्यैरसपैसंयावलड्डुकलीमोदकादि
भिः॥३॥विविधैर्व्यंजनैश्चापि नपाचारादिरोचकैः॥भोज्यैर्बहुविधैश्चान्यैर्भोजयेद नंदं वि
भुः॥४॥एवं मार्गशिरो कुर्यात्स्त्रजां प्रेमातुर येप्रतः॥५॥तस्मात्मप्रदो दद्यात् स्वभक्तिं नंदनं
दन॥५॥ इतिश्रीसंवत्सरोत्सवकल्पलतायां मार्गशिरोत्सवनिरूपणं नामचतुर्थदलं
निरूप्यते॥अथपौषमासस्य महोत्सवविधिं विभो॥महोत्सवस्वरूपं च भक्तानां भक्तिवृद्धये
॥पौषमासस्याद्यपक्षे नवम्यां पुरुषोत्तमः॥श्रीविठ्ठलेशरूपेण प्रादुरासीत्कृपानिधिः॥२॥
भक्तिमार्गप्रवृत्त्यर्थं दैवोद्धारप्रयत्नवान्॥विठ्ठलजन्माष्टमीस्यैकामासाद्धेरत एव हि॥
समीपावत्तन्त्र्यैव निर्णीतं नवमीव्रतं॥ततस्तत्कृतिसिद्ध्यर्थं कार्यस्तीत्रोत्सवो बुधैः॥४॥

शंखदुंदुभिनिर्घोषैर्गीतवाद्यैः सुमंगलैः॥ मंडपेन्मंदिरवस्त्रैस्तोरणैः कदलीदलैः॥५॥ हरि
फलैर्नालिकेरैः पताकैर्विविधैस्तथा॥ प्रातरुत्थाय च ततस्त्वाभ्यंगविधिना विभुं॥६॥ स्नापयि
त्वा ततः लक्ष्मीं भूषयेद्भूषणोत्तमैः॥ कंचुकेन वपीतेन क्षौमेनाप्यसकृत्तेन वा॥७॥ तत्कं
चुकमुखेन पीतोष्णीषोत्तमेन वा॥ नवकाश्मीररक्तेन प्रावारेण मलेन वा॥८॥ काश्मीरा
गरुसारादिमाल्यैश्च पटवासकैः॥ सुगंधैर्विविधैश्चान्यैः प्रेम्णा लक्ष्मीं समर्पयेत्॥९॥
ततश्च णाकगोधूमपिष्टेक्षुरसकासितान्॥ मोदकादीन्शिखरिणीं घनं दध्यमृतोप
मं॥१०॥ ससितं च शृतं क्षीरं नवम्रक्षणजं नवक्षितं॥ नवनीतं च ससितं कदलीफलदाडि
मान्॥११॥ तथा विविधान्पाकान्-मृतान्पायसादिकान्॥ समर्पयेद्भक्तियुक्तः श्रीलक्ष्मी
विष्णवेश्वरे॥१२॥ तांबूलाद्युपचारांश्च दत्त्वाचमनमर्पयेत्॥ ततश्चारात्रिकैर्लक्षान्वा

संप्रणमेत्स्तुस्तु॥१७॥एवंसप्रेमयःकुर्यात्श्रीविठ्ठलमहोत्सवां॥तस्यश्रीगोकुलाधीशःशि
घ्रंसंप्रविशेद्धृदि॥१८॥ ॥इतिश्रीसंवत्सरोत्सवकल्पलतायांपौषोत्सवनिरूपणंनाम
पंचमदलं॥माघमासोत्सवविधिर्लिख्यतेयथाविवेकतः॥माघेशुक्लपंचम्यांस्यादुदयव्या
पिनीयदि॥१॥तदोत्सवोवसंतारंभःकार्योगीतादिनिर्महान्॥उक्तमभ्यंगविधिनास्ना
पयित्वाचन्यसयेत्॥२॥सितैस्तुकंचुकोष्णीषकटिबंधादिनिर्नवैः॥सुगंधपुष्पचूतादिमं
जरीपत्रवादिभिः॥३॥विविधैःपटवासैश्चकुंकुमागरुसारकैः॥कोटिकंदर्पलावण्य
मर्चयेद्गोकुलाधिपं॥४॥ततश्चस्वादुपक्वान्नंयथाशक्तिनिवेदयेत्॥तांबूलमर्पयित्वा २
चत्वाह्यारात्रिकंनमेत्॥५॥ततश्चारभ्यकाश्मीरपटवासादिनिर्विभुं॥सुवाद्यैर्नृत्यगी
ताद्यैरांदोलोत्सवसमर्पयेत्॥६॥ इतिश्रीसंवत्सरोत्सवकल्पलतायांमाघोत्सवनि

निरूपणंनामषष्ठंदलं॥ ॥अथोत्सवनिरूपणं॥तेमासिफाल्गुनसंज्ञके॥फाल्गुनस्यासितेप
क्षेश्रीमद्गोवर्द्धनाधिपः॥१॥व्याजंलौकिकमाश्रित्यश्रीविठ्ठलगृहेगमत्॥प्रेमातिषंगबोधार्थं
प्रेमातिशयवत्सलः॥२॥तदागमनसंजातःश्रीविठ्ठलगोकुलेतदा॥उत्सवस्तुमहानासी
त्सन्नप्रक्योस्तिवर्णने॥३॥तदीयैस्तुतदात्यर्थंकर्तव्यश्चोत्सवोमहान्॥वस्त्रालंकारभूषा
दिभोजनैर्विविधैरपि॥४॥सुगंधपुष्पतांबुलारात्रिकादिनिरुत्तमैः॥रोमांचिततनुर्भूत्वा
प्रणमेद्व्रजाधिपं॥५॥फाल्गुन्यांपौर्णमास्यांतुस्नापयेद्व्रजनायकं॥अभ्यंगविधिनाहृष्यान
पयित्प्रेमहरितः॥६॥पुनर्होलोत्सवंकुर्यादुत्तराफाल्गुनीदिने॥तथास्कंदोत्कलस्कंदेन
पंप्रयुक्तवान्हरिः॥७॥तथाचफाल्गुन्यांक्रीडनंकुर्याद्दोलायाममन्त्रमिपेत्ति॥सर्वंदोलां(
समारोप्यमंडपेपल्लवादिभिः॥८॥नैवेद्यधूपदीपाद्यैर्दोलांसंपूजयेत्ततः॥पीतांशुक

सीतोष्मीषकंचुकादिविभूषितं।८।दोलामारोपयेत्तत्र लक्ष्मीकांतं खदुंदुभिनिस्वनैः।काश्मीरपं
कागरुसत्सादिपटवासकान्।१०।स्थापयित्वाग्रतोकुर्यात्ततस्तदभिमंत्रणं।ततस्तैस्तर्जये
च्छुष्पैर्माल्यैश्चापिसुगंधिभिः।११।ततोविविधपक्वान्नदध्यादिविनिवेदयेत्।।तांबूलमर्पयि
त्वाच कुर्यादारात्रिकंततः।१२।कृत्वैवंश्रीवात्तमेगीतैरेवंदोलोत्सवास्त्रिधा।।दत्वाप्रदक्षिणं
चाष्टप्रणामेदंडवत्क्षितौ।१३।ततोगोपिकासुतार्थदोलमुत्थापयेत्तथा।।भक्तिप्राप्तिच्छुभिः।
कार्यश्चैवंदोलमहोत्सवः।।१४।। इतिश्री संवत्सरोत्सवकल्पलतायां फाल्गुनोत्सवनिरूपणं
नामसप्तमंदलं।। ।।अथचैत्रोत्सवविधिर्विनिरूप्यते चैत्रेमासिशुक्लायांनवम्यां १०
रघुनायकः।।१।।प्रादुरासीत्ततकार्योविष्णवैरुत्सवोमहान्।तदंगत्वाद्व्रतस्यापिसोपो
ष्यासर्वथाबुधैः।।२।।नोपोष्याचाष्टमीविद्धाप्रातःस्यादष्टम्यापि।।तदभावेतुसर्वैवपारणा

दिविधानतः॥३॥अगस्त्यसंहितायांच वचनानितथैवहि॥लभ्यंतेतानिलिख्यंतेप्रमाण
त्वेनचात्रवै॥४॥तथाचा॥चैत्रेमासिनवम्यांतुजातोरामःस्वयंहरिः॥पुनर्वस्वृक्षसंयुक्ता
सातिथिःसर्वकामदा॥५॥सैवमध्याह्नयोगेनमाहपुण्यतमाभवेत्॥मेषंपूषणिसंप्राप्ते ल
ग्नेकर्कटकाह्वये॥६॥आविरासीत्सकलयाकौशल्यायांपरःपुमान्॥नवमीचाष्टमीवि
द्धात्याज्याविष्णुपरायणैः॥३॥उपोषणंनवम्यांवैदशम्यामेवपारणं॥दशम्यांपारणा
यांश्चनिश्चयान्नवमीव्रते॥४॥विद्धापिनवमीग्राह्यावैष्णवैरप्यसंशयमिति॥तत्रप्रातः
समुत्थायस्नापयेत्पंचकैर्विभुं॥५॥ततश्चांगविधिनाभूषयेच्चतयोत्तमैः॥महार्घै
र्भूषणैर्दिव्यैःवस्त्रैःकुंकुमरंजितैः॥६॥ततोमध्याह्नसमयेशंखकुंडनिनिस्वनैः॥विविधै
गीतवाद्यैश्चस्नापयेत्पंचकैःपुनः॥७॥पीतांबरेणकाश्मीरमाल्याद्यैःस्तद्विजेत्ततः॥ततश्चा

स्नपितोद्भिः विविधंनोऽन्नंपकान्नादिनिवेदयेत्॥८॥तांबूलमर्पयित्वाचकुर्यादारात्रिकंत
तः॥प्रणमेद्दंडवत्कृत्स्नंयदीछेद्भक्तिमुत्तमं॥९॥ इतिश्रीसेवकसरोत्सवकल्पलतायांचैत्रोत्स
वनिरूपणंनामषष्ठमंदलं॥७॥ निरूप्यंतेथभक्तानांतुष्टयेमाधवोत्सवः॥एकादश्यांमाघ
पक्षेमाधवेणकुलाधिपा॥१॥आविर्भाविताबान् स्वास्यंपुष्टिमार्गप्रवृत्तये॥पुष्टिमार्गप्रवर्तै
स्तुभक्तैस्तद्भक्तिसिद्धये॥२॥महोत्सवस्तत्रकार्योविविधैर्मंगलादिभिः॥प्रातरभ्यंगविधि
नास्नापयेद्व्रजवल्लभं॥३॥काश्मीररंजितैर्वस्त्रैर्भूषणैश्चमहाधनैः॥भूषयित्वाचकाश्
मीरपुष्पाद्यैश्चार्चयेद्विभुं॥४॥ततोदुग्धादिभिर्नोऽन्नैर्विविधैर्भोजयेत्प्रभुं॥ तांबूलमर्प १९
यित्वाचभेरीदुंदुभिनिःस्वनैः॥५॥विविधैर्गीतवाद्यैश्चकुर्यादारात्रिकंशुभं॥दंडवत्प्रण
मेत्प्रेम्णात्वंश्रीवल्लभात्मकं॥६॥एवंभक्तयोत्सवंकृत्वापुष्टिभक्तिमवाप्नुयात्॥श्लोक

पक्षेतुवैशाखेतृतीयाक्षयसंज्ञिता॥७॥भक्तैस्तत्रकर्तव्योविधिनाचंदनोत्सवः॥कार्योहि
विधिनातत्रप्रातरभ्यंगकंहरेः॥८॥कारयित्वाततःश्वेतप्रावारपरिधानकं॥भूषये
च्चतथावस्त्रैर्दिव्यैर्मुक्ताविभूषणैः॥९॥कुंकुमागरुकर्पूरकस्तूरीभिःसुघर्षितं॥चंद
नंस्थापयेत्पात्रेविधिनाचाभिमंत्रयेत्॥१०॥चंदनेनार्चयेद्भक्त्यापदाद्यवयवान्हरेः॥
शीतलैःपुष्पमालैश्चवीजयेद्व्यजनैस्तथा॥११॥तथाचोक्तं-स्कंदेतुप्रोक्तवान्नृपति
हरिः॥तथाच॥वैशाखस्यासितेपक्षेतृतीयाक्षयसंज्ञिता॥तत्रमांलेपयेद्गंधलेपनैरपि
शोभनंमित्यादि॥१२॥दध्योदनंमानकंचनवमृद्भाजस्थितं॥तांबूलमर्पयेद्भक्त्याकुर्या
दारात्रिकंतथा॥१३॥प्रणमेद्दंडवद्भक्त्यायःकुर्यादेवमुत्सवं॥प्रयत्नोलभतेपुष्टिंभक्ति
सपरमोत्तमां॥१४॥वैशाखस्यसितेपक्षेश्रीनृसिंहचतुर्दशी॥जयंतीसापापहराका

शालेव कार्यस्तत्रव्रतोत्सवो ॥१५॥ एवंविवादसान्नैवैवोपोष्या कथंचनमुनिनिर्व
चनंप्रोक्तंवैष्णवोद्देशातस्तता ॥१६॥ वैष्णवैस्तु न कर्तव्या स्मरविद्धा चतुर्दशी ॥ प्रातर
भ्यंगविधिनास्नापयित्वा तथोत्तमैः ॥१७॥ काश्मीररंजितैर्वस्त्रैर्भूषयेत्पुरुषोत्तमं ॥
ततश्च नित्यवत्कुर्यादासायंसेवनंहरे ॥१८॥ सायंकाले ततः कुर्यात्स्नपनं पंचकैर्वि
भो ॥ पीतांबरेण मालाभिश्चंदनेनार्चयेत्प्रभुं ॥१९॥ दध्योदनं पानकं च कर्कराकरा
दिकं ॥ समर्पयित्वा तांबुलं चार्पयेत्प्रेमसंयुत ॥२०॥ ततश्चारात्रिकं कुर्याद्गीतवादित्र
मंगलैः ॥ यादृशोसीति पद्येन प्रणमेत्पुरुषोत्तमं ॥२१॥ सर्वं कृत्वा श्रीनृसिंहजयंतीव्रत १२
मुत्तमं ॥ परमं भक्तिमाप्नोति मुच्यते चातिपातकैः ॥२२॥ ॥इतिश्री संवत्सरोत्सवकल्प
लतायां वैशाखोत्सवनिरूपणं नाम नवमं दलं ॥२३॥ उत्सवो ज्येष्ठमासस्य वि

विधिनाथनिरूप्यते।ज्येष्ठमासिसितेपक्षेरुद्रेवैचंद्रदैवते॥पौर्णमास्यांसदानंद्यासंस्ना
पयेत्सुमं॥१॥ब्रह्मणाचतथाप्रोक्तंसेष्टचेनमुनीश्वरैः॥ज्येष्ठाप्रशंसकाध्यायेपुराणेब्रह्म
संज्ञके॥२॥तथ्यश्चामासेज्येष्ठेचसंप्राप्तेनक्षत्रेचैंद्रदैवते॥पौर्णमास्यांतदास्नानंसर्व
कालहरिद्विजा॥३॥प्रथमेन्हिसायान्हेजलमानीयभक्तितः॥स्थापयेत्कलशेशुभे
मध्येपुष्पाणिनिक्षिपेत्॥४॥चंदनंतुलसीपत्रंक्षिप्त्वाचार्यनिमंत्रयेत्॥ततश्चप्रात
रुत्थायस्नापयेत्कुलाधिपं॥५॥स्वर्णंधर्ममितिश्रुत्वातथापुरुषसूक्तत॥घंटाशंख
मृदंगाद्यैर्विविधैर्मंगलैस्वनैः॥६॥ततश्चविविधैःशुभैर्वस्त्रैःलक्ष्मीविलेपयेत्प्रियाश्च
मोदकैःसुखैःपानकैर्नोत्तमैनच॥७॥भोजयेद्गोपिकाधीशंतांबूलादिदापयित्॥एवं
यःपूजयेद्भक्त्यातस्यलक्ष्मीःप्रसीदति॥८॥इतिश्रीसंवत्सरोत्सवकल्पलतायांज्येष्ठा

स्रवनिरूपणांनामद्वन्नामेदलो॥ ।महोत्सवोऽप्याषाढस्यविस्तरेणनिरूप्यते॥ आषाढस्य
शुक्लपक्षेतुपुष्यायदिनवेत्तदा॥ कार्योरथोत्सवःप्रेम्णा श्रीकृष्णप्रीतयेबुधैः॥१॥ तथाचो
क्तंजगन्नाथप्रणोदिस्कान्दपाति॥ स्कांदेसोत्कलखंडस्यऽध्यायेचैकोनत्रिंशके॥२॥ त
थाच॥ आषाढस्यसितेपक्षेद्वितीयापुष्यसंयुता॥ तस्यांरथेसमारोप्यरामंचभद्रया
सहेति॥३॥ प्रातरभ्यंगविधिनास्नापयित्वाकृष्णेश्वरं॥ सितेसुकुंकुमालेपप्रान्ताचारक्त
चिबंधनैः॥४॥ महाघरिह्रनीलेंद्रमणिवज्रादिभूषितैः॥ भूषणैर्भूषयेत्कृत्वारथम
भ्यश्चभूषयेत्॥५॥ विविधैर्भूषणैर्वस्त्रैःसंहृष्यवाहयेत्ततः॥ स्नापयित्वाचविधि ९३
वद्दीणगतिमुखंरयं॥६॥ संस्थापयेद्रथेतस्मिन्शंखवाद्येमंगलस्वनैः॥ ततोविविधप
कान्नंकर्कटीबीजमोदकान्॥७॥ मुद्गांकुरांस्तथाचाम्रान्पातकंचसितालतंकर्क

टीकदलीरम्भाफलान्यत्युत्तमोनिचा॥८॥त्रिधासमर्प्यसर्वंतांश्रूलेचत्रिधार्पयेत्॥ठत्वाचा
रात्रिकेनत्यारथंस्थंप्रणमेद्विभुं॥९॥त्रिःपरिक्रम्यगोपीनाथमुवासयेत्ततः॥एवंयः
हृजयेत्कृष्णंसर्वेठत्समवाप्नुयात्॥१०॥ इतिश्रीसंवत्सरोत्सवकल्पलतायांमाघाहो
त्सवनिरूपणंनामैकादशमेदलं॥ ॥अथश्रावणमासस्यनिरूप्यंतेमहोत्सवाः
१॥श्रावणेविमलेपक्षेएकादश्यांतुवैष्णवः॥पवित्रारोपणंकुर्यात्कृष्णमावर्ज्यनक्तितः॥
क्षौमैःकार्पासिसूत्रैर्वापवित्रंविधिवन्नरः॥सत्वासस्थापयेत्पात्रेविधिनाचाह्वयेत्ततः॥
प्रभांचिंतनतुकृत्वाश्रीलक्ष्मेविनिविदयेत्॥नयसूत्रव्यर्थास्तिसितादिविनि
वेदयेत्॥एवंयःप्रपतोन्नत्तपापविज्ञोत्सवमहोचरेत्॥गोकुलाधिनाथपादाम्बु
रतिस्यदृठानवेत्॥७॥नकुर्याद्योनरोनोहात्पवित्रारोपणंहरेः॥तस्यसंवत्सरस्त्र

तादृशानिःफलतामियात्॥५॥श्रावण्यांपौर्णमास्यांतुभद्रामुक्तेचवैष्णवः॥भक्त्याश्रीगो
कुलाधीशेरक्षाबंधनमाचरेत्॥६॥विविधैःपदसूत्रैस्तुकृत्वारक्षामनुत्तमां॥स्था
पयित्वात्रमेपात्रेकुंकुमाक्षतिकादिकं॥७॥कृत्वाचतिलकंबधारक्षांश्रीकरयोः॥
शुभां॥अर्पयित्वाचतांबूलद्वयनीराजयेत्ततः॥८॥समर्पयेत्ततोभक्त्यामृष्टस्वादून
मोदकान्॥तांबूलाद्यर्पयित्वाचप्रणमेद्दंडवत्तनु॥९॥गोकुलाधीशपादाब्जपराग
रक्तचेतसां॥भक्त्यानंदतुष्टयेप्रोक्तःसंवत्सरमहोत्सवः॥१०॥संवत्सरोत्सवानुज्ञा
त्वाकृष्णसेवासमाचरेत्॥योभक्त्यासलभेद्भावंगोकुलाधीशपादयोः॥११॥स्वम्बा २८
र्थचरणांभोजरेणुदास्यार्पितांकृता॥संवत्सरोत्सवदलैःस्तुतिकल्पलतामया॥१२
तेनचार्यप्रसीदंतुदानेनिःसाधनेमयि॥ताताज्ञात्वापियच्चात्रजीवबुध्यानिरू

पितं॥१३॥ हृषभंचाचार्यचिरणास्तस्वीयेषुदयालवः॥गोवर्द्धनोधीशपादाप
ऋद्यस्याथिनः॥सदादेवकीनंदनस्येयंप्रीतिर्विजयतेतरां॥१४॥ ॥
इतिश्रीसंवत्सरोत्सवकल्पलतायांश्रावणोत्सवनिरूपणंनामद्वादशमं
छलंसंपूर्णं संपूर्णाचेयंसंवत्सरोत्सवकल्पलता॥ श्री श्री